# अज्ञातकर्तृक अर्हत्प्रवचनसूत्र-सविवरण

सं.-पं. शीलचन्द्रविजयगणि

'**अर्हत्प्रवचन**' नामे नोंधायेली प्रस्तुत-मूलसूत्र तेमज तेनुं स्वोपज्ञ विवरण धरावती-कृतिनी एकमात्र प्रति, खंभातना श्री शान्तिनाथ प्राचीन ताडपत्रीय जैन भंडारमां सचवाई छे. मुनि पुण्यविजयजी-संपादित Catalogue of palmleaf Mss. in the Shantinatha Jain Bhandara, Cambay - part-1मां (Gos. Baroda, 1961) पृ. 174 पर क्र. 107 तरीके नोंधायेली, 139 पत्रोनी अने ११ विभिन्न कृतिओना संग्रहरूपे ताडपत्रीय हस्तप्रतिमां १०मी कृति तरीके आ 'अर्हत्प्रवचन–पंचाध्यायात्मक' नामनी कृति छे, जे १२२ थी १३८ एटले के कुल १६ पत्रोमां पथरायेली छे प्रति अधूरी - अपूर्ण होई लेखक तथा लेखन संवत आदिनुं वर्णन प्राप्त नथी, परंतु विक्रमना तेरमा शतकना पूर्वार्धमां ते लखाई होवानुं अटकळवामां आव्युं छे. कृतिना कर्तानो नामोल्लेख नथी, अने आ रचनानी प्रति अन्यत्र क्यांय-कोई भण्डारमां होवानुं अद्यावधि जाणवामां नथी आव्युं. परंतु कोई भण्डारमां कोईक आवी संग्रहात्मक पोथीमां आनी बीजी नकल मळी आवे ते अशक्य न गणाय.

'अर्हत्प्रवचन' ए तद्दन सरल छतां प्रगल्भ भाषामां थयेली मधुर लघु रचना छे. पांच मोटां सूत्रो छे, जेने अहीं 'अध्याय' तरीके वर्णवेल छे, अने ते सूत्रोमां दर्शावेला आंक मुजबना पदार्थोनुं स्वरूपवर्णन-मात्र करती विवृति पण आमां ज छे, जे संभवतः सूत्रकारे ज रचेल जणाय छे. वाक्यो टूंकां टूंकां छे, पद्धति सूत्रात्मक छे . थोडा अने ते पण सरल शब्दोमां जैनदर्शननी समजण आपवानो कर्तानो मजानो प्रयास छे, ए तो प्रथम दृष्टिए ज जणाई आवे.

पांच अध्यायो पैकी प्रथममां १०, द्वितीय अने तृतीयमां २०-२० , चतुर्थमां १३ तथा पंचम अध्यायमां १८ पदार्थोनुं प्रतिपादन थयुं छे. आ पदार्थोमां केटलीक बाबतो खास ध्यानार्ह छे, ते आ प्रमाणे :

१. पांच अणुव्रतो (१-३) नी साथे रात्रिभोजनत्यागने पण षष्ठ अणुव्रत गणाव्युं छे; प्रचलित परंपरामां तेनो समावेश सातमा व्रतमां थयो छे. २. सामान्य पद्धतिमां पहेलां समिति, पछी गुप्ति-एम क्रम छे, ज्यारे अहीं पहेलां गुप्ति, पछी समिति (१/६-७) वर्णवेल छे. ३ साधुना रजोहरण माटे '**पिच्छक**' शब्द अहीं प्रयोजेल छे (१/७) सामान्यतः आ शब्द दिगम्बर परंपरामां वपराता 'मोरपिच्छ' माटे प्रयोजाय छे. ४. दशविध 'यतिधर्म 'ने माटे 'देश

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धर्मानुभावना:' एवो प्रयोग (१-८) थयो छे, तो 'रत्नप्रभा' आदी ७ नरक पृथ्वीओने **"धर्मभूमि"** तरीके (३-९) वर्णवी छे. ५. सिद्धान्तमां दशविध प्रायश्चित्त प्रसिद्ध छे, ज्यारे अहीं प्रायश्चित्त १२ प्रकारनां गणाव्यां छे, ते पण जुदी रीते, अने तेमां दशविध प्रायश्चित्तोनो पूर्णत: समावेश तो नथी ज थतो (२/१५) ६. नव तत्त्वनुं प्रतिपादन ७ तथा ९ एम बे भेदे परंपरामां मळे छे, अहीं तेने जुदां जुदां पाडीने जीवादि ९ पदार्थो (२/१) अने जीवादि ७ तत्त्वो (२/२) एम वर्णव्यां छे. ७. चार प्रकारनां ध्याननी व्याख्याओ परंपरा करतां जुदी पडे छे. तेने वर्णवतां पद्यो पण ध्यानपात्र छे (२/१९) ७. कल्पस्थितिक-वैमानिक प्रकारो माटेनी मान्य संख्याथी जुदा पडीने तेना १६ प्रकारो/नामो अहीं वर्णव्यां छे; (४/५) तो नव ग्रैवेयको तथा अनुत्तर-एम मळीने कल्पातीत देवो (अहमिन्द्रो)ना १० भेद बताव्या छे; पाछा पांच अनुत्तरो जुदां तो खरां ज (४/६) ८. नव 'अनुदिश' प्रकारना देवो पण जणाव्या छे (४/५) जेने माटे तत्त्वार्थसूत्रमां कोई निर्देश जणातो नथी; नव लोकन्तिको ते आ होई शके? ९. द्विविध शील (४/१४), बे भेदनी निर्जरा (५/६) द्विविध संयम (१/८), देश अने सर्व-बे जातनो मोक्ष (५/११) त्रण प्रकारे सिद्ध (५/१५) बार सिद्धानुयोगद्वारो (५/१६) - आ बधां अपूर्व वर्गीकरणो छे. १०. पुलाकादि पांच भेदे निर्ग्रन्थोनुं स्वरूप मान्य सैद्धान्तिक परंपराने तद्दन चातरनारुं अपूर्व जणाय छे (५/१४). आ पांच निर्ग्रन्थ-स्वरूप-वर्णनमां ज 'प्रथमानुयोग' नो उल्लेख पण छे, जे नोंधपात्र छे. ११. त्रण अज्ञानोमां त्रीजुं. 'विभंगज्ञान' तरीके ज परंपरामां प्रसिद्ध छे, अहीं (२/१०) तेने **विभङ्गज्ञान**-नामे वर्णव्युं छे. ए ज रीते, १४ पूर्वमां अग्यारमुं पूर्व नन्दिसूत्रादिमां 'अवन्ध्य' पूर्व तरीके गणाव्युं छे, ज्यारे अहीं (२/१३) तेने 'कल्याण' एवा नामे ओळखायेल छे. १२. केटलांक नामो पण ध्यान देवा जोग छे. त्रिपिष्ठ (त्रिपृष्ठ), द्विपिष्ठ (द्विपृष्ठ), अरु(अर; तीर्थंकर), रामण (रावण), प्रढाल (पेढाल), जरासिन्धु (जरासन्ध), प्रागम्य (प्राकाम्य) इत्यादि.

एकंदरे कृतिने तपासतां कहेवुं जोईए के परंपराथी न्यारुं आमां घणुं छे. कदाच तेथी ज तेनो झाझो प्रचार न थयो होय तो ते बनवाजोग छे. आ रचना जो दिगम्बर परंपरानी होय तो ते माटे ते परंपराना ग्रन्थो तथा प्रतिपादनो तपासवानां रहे. परंतु तत्त्वार्थसूत्र तो दिगम्बरपरंपरामान्य पण छे, अने आमां तेनाथी पण केटलीक बाबतो जुदी पडे छे.

जे होय ते, पण आ रचना अपूर्व छे, तेनुं भाषा सौष्ठव तेमज प्ररूपण विलक्षण छे, तेमां शंका नथी. क्षणार्ध माटे एवो पण विचार झबकी जाय के हेमाचार्यना शिष्य आ. रामचन्द्रनी तो आ रचना नहि होय ? भाषा, विचारो अने प्रतिपादनोनी मौलिकता जोतां आवो प्रश्न सहज जागे, तो पण ते अनुत्तर ज रहे छे.

आ रचना विशे कोइ जाणकार वधु प्रकाश पाडे तो ते आवकारदायक हशे !

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अज्ञातकर्तृकं
# श्री अर्हत्प्रवचनसूत्रम् ॥

अथातो अर्हत्प्रवचनं व्याख्यास्यामः । तद् यथा ॥ तत्रेमे षड् जीवनिकायाः । पञ्च महाव्रतानि । पञ्चाणुव्रतानि । त्रीणि गुणव्रतानि । चत्वारि शिक्षाव्रतानि । तिस्रो गुप्तयः पञ्च समितयः । दश धर्म्मानुभावनाः । द्वादशानुप्रेक्षाः । द्वाविंशति परीषहाः ॥ इत्यर्हत्प्रवचने **प्रथमोऽध्यायः** समाप्तः ॥

अथातोऽर्हत्प्रवचनसङ्ग्रहं व्याख्यास्यामः । तद्यथा- अथेत्ययं निपातः पूर्व्वप्रकृत्यपेक्षः । अथ (त) इति पञ्चमीनिर्देशः ।

अर्हन्तो नाम भगवन्तो लोकोत्तमाः सर्व्वज्ञाः सर्व्वलोकदर्शिनः । तैरुपदिष्टं प्रवचनं गणधरदेवै रचितम् । तद् व्याख्यास्यामः कथयिष्यामः प्रकाशयिष्यामः इत्यर्थः (१) तथैव षट्(ड्) **जीवनिकायाः** । कतमाः ? । पृथ्वीकायिकाः। आपःकायिकाः । तेजः-कायिकाः । वायुकायिकाः । वनस्पतिकायिकाः । त्रसकायिकाश्चेति । एते षट्(ड्)-जीवनिकाया न हिंस(सि)तव्या व्रतपरिरक्षणार्थम् ।

(२) **पञ्च महाव्रतानि** । कतमानि ? । यावज्जीवं प्राणातिपाताद्विरतिः । यावज्जीवं मृषावादाद्विरतिः । यावज्जीवं अदत्तादानाद्विरति : । यावज्जीवं मैथुनाद्विरतिः । यावज्जीवं परिग्रहाद्विरतिः । इत्येतानि रात्रि भोजनाद्विरतिः षष्ठानि भवन्ति ।

(३) **पञ्चाऽणुव्रतानि** । कतमानि ? । यावज्जीवं स्थूलकृतप्राणातिपाताद्विरतिः । यावज्जीवं स्थूलकृतमृषावादाद्विरतिः । यावज्जीवं स्थूलकृतअदत्तादानाद्विरतिः । यावज्जीवं स्वदारसन्तोषः परदाराद्विरतिः । यावज्जीवं इच्छाकृतपरिग्रहपरिमाण(णं) । षष्ठं अणुव्रतं रात्रिभोजनं(न) वर्ज्जनमिति । एतानि पञ्चाणुव्रतानि ।

(४) तत्र **त्रीणि गुणव्रतानि** । [कतमानि ?] । दिसि(शा)विदिसि(शा)-प्रत्याख्यानं द्विविधम(न)र्थदण्डाद्विरति :। कतमाः (माः) ? ।

दण्ड-पास(श)विरालश्च विष-स(श)स्त्राग्नि-रज्जवः ।
परेभ्यो नैव देयास्ते स्वपरघातहेतवः ॥
छेदं भेदं वध(धं) बन्धं गुरुभारातिरोपणम् ॥
न कायन्ति स्वयमन्येषु (मन्यैः) ।

तृतीयं गुणव्रतं भोगोपभोगकृतपरिमाणं चेति ॥ एतानि त्रीणि गुणव्रतानि ॥

(५) **चत्वारि शिक्षाव्रतानि** । कतमानि ? । सामायिकम् । दिवसावशेषिकम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पर्व्वे(र्वणि) पौषधोपवासिकम् । अतिथिसंविभागिकम् । पश्चिमसंल्लेखनामरणान्तिकम् । एतानि चत्वारि शिक्षाव्रतानि । तत्र शीलव्रतानि कथितानि श्रावकधर्म्मश्चेति ।

(६) **तिस्रो गुप्तयः । कतमा : ?** । कायगुप्ति । वचोगुप्ति । मनोगुप्तिरिति । तत्र कायगुप्तिर्नाम स(श)यनासनादाननिक्षेपणस्थानचंक्रमणाकुञ्चनप्रसारणादीनां कायचेष्टानियमः। स एषा कायगुप्तिर्नाम । वाचनप्रच्छनप्रश्नव्याकरणादिषु वाग्गुप्तिर्नाम । मनोगुप्तिर्नाम सर्व्वसावद्यसङ्कल्पनिरोधः, तथा अकार्यका(क)रणचिन्तनीयस्य निरोधः । स मनोगुप्तिः । एताः तिस्रो गुप्तयः ।

(७) **पञ्च समितयः** ।कतमाः ?।ईर्या-भाषा-एषणा-आदान निक्षेपणोत्सर्गाश्चेति। तत्र ईर्यासिमितिर्नाम 'इ(ई)रगतै' धात्वर्थे । ईर्या नाम रथस(श)कटयानवाहनाक्रान्तेषु मार्ग्गेषु प्राशुकविविक्तेषु सूर्यरश्मिप्रकाशितेषु युगम(युग) मात्रदृष्टिना भूत्वा गमनागमनं कर्तव्यमिति । एषा ईर्यासमितिः ।। भाषासमितिर्नाम हितमितअसन्दिग्धनिरवद्यार्थ-नियमभाषिणी वाणी भाषितव्या । एषा भाषासमितिर्नाम ।। पाणिपात्रे भिक्षागोचरगतेन अननुमताऽकृतअकारितअसङ्कल्पितनवकोरिपरिशुद्धं दशदोषविवर्ज्जितं चतुर्दशमलवि-शुद्धं निर्द्धूमं भोक्तव्यमिति सा एषणासमितिर्नाम । आदाननिक्षेपणा समितिर्नाम अङ्गोपाङ्ग-प्रत्यङ्गाकुञ्चनप्रशा(सा)रणादीनां निषद्यास(श)य्यासनादीनां अवस्यं(श्यं) निरीक्ष(क्ष्य) **पिच्छकेन** प्रमार्य(र्ज)नादाननिक्षेपः(पादि ?) कर्तव्यमिति । सा एषणा(एषा)-ऽऽदाननिक्षेपणासमितिः । उत्सर्गसमितिर्नाम स्थाण्डिल्ये स्थावरजङ्गमजन्तुविवर्ज्जिते निरीक्ष(क्ष्य) प्रमृज्य वातमूत्रपुरीषोत्सर्गश्लेष्मादीनां (वातमूत्रपुरीषश्लेष्मादीनां उत्सर्गः) कर्तव्यः । सा उत्सर्गसमितिनार्म । एता(:)पञ्च समितयः

८. **दश धर्म्मानुभावना :** । कतमा : ? । उत्तमक्षमामार्द्दवार्ज्जवसत्यसौ(शौ)च-संज(य)मस्त(त)पस्त्यागाकिञ्चि(ञ्च)न्यब्रह्मचर्यमिति । उत्तमक्षमा नाम सर्व्वसत्त्व-सहिष्णुत्वम् । मार्दवं नाम मृदुत्वम् । आर्जवं नाम ऋजुत्वम् । सत्यं नाम अवञ्चकत्वम् सौ-(शौ) चं नाम निर्लोभत्वम् । सं(य)मो नाम द्विविध :- इन्द्रियसंज(य) मः । प्राणसंज-(य)मश्चेति । तपो नाम इच्छानिरोधः । त्यागो नाम निर्ममत्वम् । आकिञ्चन्यं नाम अपरिग्रहत्वम् । ब्रह्मचर्यं नाम अमैथुनत्वम् । एता दश धर्म्मानुभावना (:) ।

(९) **द्वादशानुप्रेक्षा ( : )** ।कतमाः ?। अध्रुव( :) ।अस(श)रण( :) ।अनित्यः। संसार : । एष: (एकः) । अन्यः । अशुचि ( :) । आश्रव: । संवरः । निर्ज्जरा: (रा) । लोकः। बौधि:(धे:) दुर्ल्लभत्वम् । धर्म्मस्वाख्यात( :) । एत(ता) द्वादशानुप्रेक्षा भवन्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१०) **बावीस( द्वाविंशति )परीस( ष )हाः** । कतमा : ? । क्षुत्परीषहः । पिपासा परीस(ष)हः । सी(शी)तपरीषहः । उष्णपरीषहः । मस(श)कपरीषहः । नग्नपरीषहः । रतिअरतिपरीषहः । स्त्रीपरीषहः । चर्यापरीषहः । निद्रा( निषद्या ?) परीषहः । सज्या( शय्या)-परीषहः । आक्रोशपरीषहः । वधबन्धपरीषहः । अयाचनापरीषहः । अलाभपरीषहः । रोगपरी-षहः । तृणस्पर्श [परीषहः] । मलपरीषहः । अस्नानपरीषहः(?) । सत्कारपरीषहः । पुरस्कार-परीषहः । (सत्कारपुरस्कार परीषहः ?) प्रज्ञा[ परीषहः] । अज्ञानपरीषहः । सम्यक्त्वपरीषह श्चेति । एते द्वाविंशतिपरीषहाः ॥

इत्यर्हत्प्रवचने प्रथमोऽध्यायः समाप्तः ॥ ॥

## द्वितीयोऽध्यायः

नव पदार्थाः । [सप्त तत्त्वानि] । चतुर्विधो न्यासः । सप्त नयाः । चत्वारि प्रमाणानि। षट्(ड्) द्रव्याणि । पञ्चास्तिकायाः । द्विविधो गुणः । पञ्चज्ञानानि । त्रीणि अज्ञानानि । चत्वारि दर्शनानि । द्वादशाऽङ्गानि । चतुर्दश पूर्व्वाणि । द्विविधं तपः । द्वादश प्रायश्चितानि । चतुर्विधो विनयः । दश वैयावृत्ता(त्त्या)नि । पञ्चविधो(धः) स्वाध्यायः । चत्वारि ध्यानानि । द्विविधो व्युत्सर्गः ॥ इति अर्हत्प्रवचने द्वितीयं सूत्रम् ॥

अतो विवरः । (१) **नव पदार्था (:)** । कतमाः ?। जीवाजीवपुण्यपापा-श्रवसंवरनिर्ज्जराबन्धमोक्षाश्चेति । एते नव पदार्था : ॥

(२) **सप्त तत्त्वानि** । कतमानि ? । जीवाजीवाश्रवसंवर निर्ज्जराबन्धमोक्ष(क्षा)-श्चेति । एतानि सप्त तत्वानि ॥

(३) **चतुर्विधो न्यासः** । [कतमः ? ।] नामस्थापनाद्रव्यभावतश्चेति । स एष चतुर्विधो न्यासः ॥

(४) **सप्त नयाः** । कतमाः ? । नैगमसङ्ग्रहव्यवहार ऋजुसूत्रशब्दसमभिरूढैवम्भूता नयाः । नैगमो द्विभेदः देशग्राही । सकलग्राही । शब्दस्तु द्विभेदः । समभिरूढः । समभिरूढः । एवंभूतः । इत्येष सप्तनया(य)भेदः ॥ (?)

(५) **चत्वारि प्रा( प्र )माणानि** । कतमानि ? । प्रत्यक्षम् । अनुमानम् । उपमानम्। आप्तवचनम् । एतानि चत्वारि प्रमाणानि । प्राधान्येन द्वे एव प्रमाणे । प्रत्यक्षं परोक्षं चेति॥

(६) **षट् ( ड् )द्रव्याणि** । कतमानि ? । जीवः । पुद्गलः । धर्म्मः । अधर्म्मः । आकास(शः)काल(:) । इति षट्(ड्) द्रव्याणि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(७) **पञ्चाऽस्तिकाया:** । कतमा: ? । जीवकाय (जीवास्तिकाय:) । पुद्गल-(लास्ति)काय(:) । धर्म्माधर्म्मकाय (धर्मास्तिकाय: । अधर्मास्तिकाय:) । आकाश-(शास्ति)कायमि(य इ)ति ॥

चतुर्भि: प्रमाणै: जीवति जीविष्यति जीवितपूर्वो वा जीव: । पूरणात् पुद्गल: । पूरयति गालयतीति वा पुद्गल: । धर्मास्तिकायो गतिलक्षण: । अधर्म्मास्तिकाय: स्थितिलक्षण: । आकाशास्तिकायश्चावगाहनालक्षण: । एते पञ्चाऽस्तिकाया: ॥

(८) **द्विविधो गुण:** । कतम: ? । जीवगुण: अजीवगुणश्चेति । एवं द्विविधो गुण: ॥

(९) **पञ्च ज्ञानानि** । कतमानि ? । मतिज्ञानम् । श्रुतिज्ञानम् । अवधिज्ञानम् । मन:पर्यवज्ञानम् । केवलज्ञानं चेति । एतानि पञ्च ज्ञानानि भवन्ति ॥

(१०) **त्रीणि अज्ञानानि** । [कतमानि ? ।] मत्यज्ञानम् । श्रुताज्ञानम् । विभङ्गाज्ञानं चेति । एतानि त्रीणि अज्ञानानि ।

(११) **चत्वारि दर्शनानि** । कतमानि ? । चक्षुद (र्द) र्शनम् । अचक्षुद (र्द) र्शनम् । अवधिदर्शनम् । केवलदर्शनमिति । एतानि चत्वारि दर्शनानि ॥

(१२) **द्वादशाऽङ्गानि** । कतमानि ? आचार: । सूत्रकु(कृ)त: । स्थानम् । समवाय: । व्याख्याप्रज्ञप्ति: । ज्ञातृकथा । उपासकाध्ययनम् । अन्तकु(कृ)द्दशा । अनुत्तरो(रौ)पपा(पा)-दिकंदसं(कदशा:) । प्रश्नव्याकरणम् । विपाकसूत्रम् । दृष्टिवादं च । एतानि द्वादशाऽङ्गानि ॥

(१३) **चतुर्दश पूर्व्वाणि** । कतमानि ? । उत्पादपूर्व्वम् । अग्रायणीयम् । वीया-(र्या)नुप्रवादम् । नास्तिप्रवादम् । ज्ञानप्रवादम् । सत्यप्रवादम् । आत्माप्रवादम् । कर्म्मप्रवादम् । प्रत्याख्याननामधेयम् । विद्यानुप्रवादम् । कल्याणनामधेयम् । प्र(प्रा)णावायम् । क्रियाविसा(शा)लम् । लोकबिन्दुसारं चेति । एतानि चतुर्दश पूर्व्वाणि ॥

(१४) **द्विविधं तप:** । कतमा :(मम्) ? । बाह्या(ह्यम)भ्यन्तरं चेति । बाह्यं तप: षड्विधम् । अनस(श)नम् । अवमौदर्यम् । वृत्तिपरिसंख्यानम् । रसपरित्याग: । कायक्लिेस -(क्लेश:) । विवित्तस(श)य्यासनमिति ॥ अभ्यन्तरं षट्(ड्)विधम् । प्रायश्चित्तम् । विनयो (य:) । वैयावृत्तम् । स्वाध्यायो (य:) । ध्यानम् । व्युत्सर्गश्चेति । एतद् द्विविधं तप: ॥

(१५) **द्वादश प्रायश्चित्तानि** । कतमानि ? । अर्द्धमासिकसमुद्घातम् । मासिकसमुद्घातम् । द्विमासिकसमुद्घातम् । त्रमासिकसमुद्घातम् । चतुर्मासिक-समुद्घातम् । पञ्चमासिकसमुद्घातम् । षण्मासिकसमुद्घातम् । एक आलोचनार्ह: । एक उपस्थापनार्ह: । एक: प्रतिक्रमणार्ह: । एक: कृपायोग्यार्ह: । एक: कायोत्सर्गार्ह: । एतानि द्वादश प्रायश्चित्तानि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१६) **चतुर्विधो विनयः** । कतमः ? । दर्शनविनयः । ज्ञानविनयः । चारित्रविनयः । औपचारिकविनयश्चेति चतुर्विधो विनयः ॥

(१७) **दश वैयावृत्ता( त्त्या )नि** । कतमानि ? । आचार्यवैयावृत्त्यम् । उपाध्यायवैयावृत्त्यम् । तपस्विवैयावृत्त्यम् । सिष्य( शैक्ष )वैयावृत्त्यम् । गणवैयावृत्त्यम् । कुलवैयावृत्त्यम् । [ सङ्घवैयावृत्त्यम् । ] सा( शा )स्त्र( साधु ? )वैयावृत्त्यम् । ग्लानवैयावृत्त्यम् । मनोज्ञवैयावृत्त्यम् । एतानि दस( श )वैयावृत्ता( त्त्या )नि ॥

(१८) **पञ्चविधः स्वाध्यायः** । कतमानि ( कतमः ) ? । वाचन( ना ) । प्रच्छन( ना ) । अनुप्रेक्षा । आम्नायः । धर्मोपदेशश्चेति । एषः( ष )पञ्चविधः स्वाध्यायः ॥

(१९) **चत्वारि ध्यानानि** । कतमानि ? । आर्त्तरौद्रध्यान( धर्म्म )शुक्लानि । आर्त्त( र्त्तं ) नाम राज्योपभोगसं ( ? ) शयनवाहन वस्त्राभरणेषुइच्छा भिलाषमतिपूर्व्वकम् । तदार्त्तं नाम । रौद्रं नाम छेदनदहनताडनबन्धनमरणानुकम्पारहितरागकरणं तत् रौद्रं ध्यानं नाम । सूत्रार्थमार्गणमहाव्रतभावनापञ्चेन्द्रियोपशमनबन्धमोक्षगमनहेतुचिन्तापूर्वकं धर्म्मध्यानं नाम । शुक्लध्यानं नाम इन्द्रियविषयप्रवृतमनोवाका( का )य सङ्कल्पनिकृ( वृ )ता( त्त्या )-त्मकं मोक्षकारणं शुक्लध्यानमिति । एतदेवाह–

राज्योपभोगशयनासनवाहनेषु
स्त्रीगन्धमाल्यमणिरत्नविभूषणेषु ।
इच्छाभिलाषमतिमात्रमुपैति मोहात्
ध्यानं तदार्त्तमिति तत्प्रवदन्ति सन्तः ॥
संछेदनैर्दहनताडनमारणैश्च
बन्धप्रहारदर्शनैश्च विकर्तनैश्च ।
यस्येह रागमुपजा( या )ति न चानुकम्पा
ध्यानं [ च ] रौद्रमिति तत्प्रवदन्ति तज्ज्ञाः ॥
सूत्रार्थमार्ग्गणमहाव्रतभावनानि
पञ्चेन्द्रियोपशमनानि दया च भूते ।
बन्धप्रमोक्षगमना गतिहेतुचिन्ता
ध्यानं सुधर्म्ममिति तत्प्रवदन्ति तज्ज्ञा : ॥
यस्येन्द्रियाणि विषयेषु निवर्त्तितानि
सङ्कल्पकल्पमविकल्पविकारदोषैः ।
योगैस्त्रिभिस्त्वहरहर्निभृतान्तरात्मा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ध्यानं तु शुक्लमिति तत्प्रवदन्ति तज्ज्ञा :॥
आर्ते तिर्यग्गतिस्तथा (?) गतिरधो ध्याने तु रौद्रे सदा
धर्मे देवगतिः शुभं च हि फलं शुक्ले च जन्मक्षयं(यः) ।
तस्माद् व्याधिरुजान्तके हितकरे संसार निस्तारके
शुक्लध्यानवरे रजःप्रशमने कुर्व्वन्तु यत्नं बुधाः ! ॥
एतानि चत्वारि ध्यानानि ॥

(२०) **द्विविधो व्युत्सर्ग्गः** । कतमः?। बाह्योऽन्तरश्चेति । बाह्यो नाम सर्व्वारम्भपरित्यागः । अभ्यन्तरो रागद्वेषमोहादीनां परित्यागः । इत्येवं द्विविधो व्युत्सर्ग्गः। इत्यर्हत्प्रवचने द्वितीयोऽध्यायः समाप्तः ॥

## तृतीयोऽध्यायः

त्रिविधः कालः । षट्(ड्)विधः कालसमयः । त्रिविधोलोकः।अर्द्धतृतीयद्वीपसमुद्राः। पञ्चदेश क्षेत्राणि । चतुस्त्रिंशद्वर्षधरपर्वताः । पञ्चदश कर्म्मभूमयः । त्रिंशद् भोगभूमयः । सप्त धर्म्मभूमयः । सप्तैव च महानरकाः । चतुर्दश कुलकराः । चतुर्विंशतितीर्थकराः । नव बलदेवाः । नव वासुदेवाः । नव प्रतिवासुदेवाः । एकादश रुद्राः । द्वादश चक्रवर्त्तिनः। नव निधयः । चतुर्दश रत्नानि । द्विविध(:) पुद्गलः ॥

इति अर्हत्प्रवचने तृतीयं सूत्रम् ॥

(१) **त्रिविधः काल** : । कतमः ?। अतीतोऽनागतः वर्तमानश्चेति त्रिविधो(धः) कालः ॥

(२) **षट्(ड्)विधः कालसमयः** । कातमः ?।सुषमसुषमः।सुषमः। सुषमदुःखमा(मः) ।दुःखमः(म)सुखमः।अतिदुःखमः।इत्येष षड्विधः कालसमयः॥

(३) **त्रिविधो लोकः** । कातमः ? उद्धर्वलोकः । अधोलोकः । तिर्यग्लोक : । इत्येष त्रिविधो लोकः ॥

(४) **अर्द्धतृतीया द्वीपसमुद्राः** । कतमाः ? । जम्बूदीपः लवणसमुद्रः । धातु(त)कीखण्डः । कालोदधिसमुद्रः । पुष्करार्द्धं चेत्येते अर्द्धतृतीया द्वीपसमुद्राः॥

(५) **पञ्चदश क्षेत्राणि** । कतमानि ? । पञ्च भरतानि । पञ्च विदेहानि । पञ्च ऐरावतानि । एतानि पञ्चदश क्षेत्राणि ॥

(६) **विंशति(:) वर्षाः**। कतमाः ? । पञ्च हैमवताः । पञ्च हरिवंसाः (वर्षाः) । पञ्च रम्यकाः । पञ्च हैरण्यवताः । इत्येते विंशतिवर्षाः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(७) **चतुस्त्रिंशद्वर्षधरपर्वताः** । कतमा :। ? पञ्च हिमवन्तः । पञ्च महाहिमवन्तः। पञ्च निषध(धा): । पञ्च नीला(:) । पञ्च रुक्मिणः । पञ्च शिखरिणः । चत्वार इषुकारपर्व्वताः॥

(८) **पञ्चदश कर्म्मभूमयः** । कतमा : ?। पञ्च भारतिकाः । पञ्चे ऐरावतिकाः । पञ्च महावैदि(देहि)काः । पञ्चोत्तरकौरविकाः । पञ्च देवकौरविकाः ।

[अत्रैवं पाठः सम्भाव्यते- '' पञ्चदश कर्मभूमयः । कतमाः ? । पञ्च भारतिकाः। पञ्च ऐरावतिकाः । पञ्च महावैदेहिका : । एताः पञ्चदश कर्मभूमयः ॥

त्रिंशद् भोगभूमयः । कतमाः ? पञ्च हैमवताः । पञ्च हारिवर्षाः । पञ्च राम्यकाः। पञ्च हैरण्यवताः । पञ्च देवकौरविकाः । पञ्चोत्तरकौरविकाः ।] एतास्तृंस(स्त्रिंश)द् भोगभूमयः ॥

(९) **सप्त धर्म्मभूमयः** । कतमाः ? । रत्नप्रभा । स(श)र्करप्रभा । वालुकप्रभा। पङ्कप्रभा । धूमप्रभा । तमप्रभा । महातमप्रभा । एता(:) सप्त धर्म्मभूमयः ॥

(१०) **सप्त महानरकाः** । कतमाः ? । कालः । महाकालः । रौरवः । महारौरवः। असिपत्रवनम् । कूटशाल्मलिः । कुम्भीपाकश्चेति । एते सप्त महानरकाः ॥

(११) **चतुर्दश कुलकराः** । कतमाः ? सनुमतिः(?) प्रश्रुतिः । क्षेमंकरः। क्षेमन्धरः। सीमङ्करः । सीमन्धरः । विमलवाहनः । चक्षुष्मान् । यशस्वी । अभिचन्द्रः । चन्द्राभः । प्रसेनजित् । मरुदेवः । नाभिश्चेति । एते चतुर्दश कुलकराः ॥

(१२) **चतुर्विंशति तीर्थकराः** । कतमाः ? । ऋषभः । अजितः । सम्भवः । अभिनन्दः । सुमतिः । पद्मप्रभः । सुपार्श्वः । चन्द्रप्रभः । पुष्पदन्तः । शीतलः । श्रेयांसः । वासुपूज्यः । विमलः । अनन्तः। धर्म्मः । शान्तिः । कुन्थुः । अरः । मल्लिः । मुनिसुव्रतः। नमिः । अरिष्ठनेमिः । पार्श्वः । वर्धमानश्चेति । एते चतुर्विंशतितीर्थकराः ॥

(१३) **नव बलदेवाः** । कतमाः ? । विजयः । अचलः । सुधर्म्मः । सुदर्शनः । नन्दकः । नन्दिमित्रः । रामः । पद्मश्चेति । एते नव बलदेवाः ॥

(१४) **नव वासुदेवाः** । कतमाः ? । त्रिपिष्ठः । द्विपिष्ठः । स्वयम्भूः । पुरुषोत्तमः। पुरुषसिंहः । पुरुषपुण्डरीकः । दत्तः । नारायणः । विष्णुश्चेति । एते नव वासुदेवाः ॥

(१५) **नव प्रतिवासुदेवाः** । कतमाः ? । अश्वग्रीवः । तारकः । मेरुकः । निसु(शु)म्भः । बलिः । प्रह्लादः । मधुकीटकः । रामणः । जरासिन्धुश्चेति । एते नव प्रतिवासुदेवाः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१६) **एकादश रुद्राः** । कतमाः ? । भीमावलिः । जितशत्रुः । रुद्रः । विश्वानलः। सुप्रतिष्ठः । अचलः । पुण्डरीकः । अजितधरः । अजितनाभिः । प्रढालः । सातकिसुतश्चेति । एते एकादस(श) रुद्राः ॥

(१७) **द्वादश चक्रवर्तिनः** । कतमाः ? भरतः । सगरः । मघवा । सनंतकुमारः। शान्तिः । कुन्थुः । अरुः । सुभूमः । पद्मः । हरिषेणविजयः । ब्रह्मदत्तश्चेति । एते द्वादशः। चक्रवर्तिनः ॥

(१८) **नव निधय(:)** । कतमाः ? । नैसर्पः । माणवकः । पिङ्गलः । पाण्डुकः। कालः । महाकालः । पद्मः । शङ्खः । सर्वरत्नश्चेति । एते नव निधयः ।

(१९) **चतुर्दश रत्नानि** । कतमानि ? चक्रं । छत्रं । चर्म्म । मणिः । काकणिः। खड्ग । दण्डः । हयः । गजः । सेनापतिः । उपरोहितः(पुरोहितः) । ग्र(गृ)हपतिः । स्थपतिः। कन्याश्चे(चे)ति । एवं चतुर्दश रत्नानि ॥

(२०) **द्विविधः पुद्गलः** । स्कन्धः । परिमाण(परमाणु) श्चेत्येष द्विविध(:) पुद्गलः॥

**इत्यर्हत्प्रवचने तृतीयोऽध्यायः समाप्तः ॥**

## चतुर्थोऽध्यायः ॥

देवाश्चतुर्णिकायाः । भवनवासिनो दशविधाः । व्यन्तरा (अ)ष्टविधाः । ज्योतिष्काः पञ्चविधाः । वैमानिका द्विविधाः । कल्पस्थितिका अहमिन्द्राश्चेतिः । [पञ्चानुत्तराः ।] पञ्च जीवगतयः । षट् पुद्गलगतयः । अष्टविधश्चात्मसद्भावः । पञ्चविधं शरीरम् । अष्टगुणा रिद्धिः पञ्चेन्द्रियाणि । षट् लेस्याः(श्याः) । द्विविधं शीलम् ।

**इत्यर्हत्प्रवचने चतुर्थं सूत्रं समाप्तम् ॥ ॥**

(१) **देवाश्चतुर्निकायाः** । कतमाः ? । भवनवासिनो(नः) । व्यन्तराः । ज्योतिष्काः। वैमानिकाः । एते चतुर्निकायाः ॥

(२) **भवनवासिनो दशविधाः** । कतमाः ? असुरकुमाराः । नागकुमाराः । सुवर्णकुमाराः । अग्निकुमाराः । वायुकुमाराः । स्तनितकुमाराः । विद्युत्कुमाराः । उदधिकुमाराः । द्वीपकुमाराः । दिक्षु(क्) कुमाराः । एते भवनवासिनो दशविधाः ॥

(३) **व्यन्तरा [अ]ष्टविधाः** । कतमाः ? । किन्नरः । किम्पुरुषः । महोरगः । गन्धर्व्वः । यक्षः । राक्षसः । भूतः । पिसा(शा)चाश्चेति । एते व्यन्तरा (अ)ष्टविधा :॥

(४) **ज्योतिष्काः पञ्चविधाः** । कतमाः ? सूर्य(ा)चन्द्रमसौ ग्रहनक्षत्र प्रकीर्णकताराकाश्चेति । एते ज्योतिष्काः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(५) **वैमानिका द्विविधा:** । कल्पस्थितिका अहि(ह)मिन्द्राश्चेति । कल्पस्थति(का:) षोडस(श)विधा । कापिष्ठ: । सु(शु)क्र: । महासु(शु)क्र: स(श)तार: । सहस्रार:। आणत: । प्राणत: । आरण: । अच्युतक श्चेति । एते कल्पस्थितिका: ॥ अहमिन्द्रा नव (?दश)विधा । कतमा: ? प्रथमा(म)प्रथमग्रैवेयकविमानवासिन: । प्रथममध्यमग्रैवेयकविमान वासिन: । प्रथमउपरिमग्रैवेयकविमानवासिन: । मध्यमप्रथमग्रैवेयकविमानवासिन:। मध्यममध्यमग्रैवेयकविमानवासिन: । मध्यमउपरिमग्रैवेयकविमानवासिन: । उपरिम प्रथमग्रैवेयकविमानवासिन: । उपरिममध्यमग्रैवेयकविमानवासिन: । उपरिमउपरिमग्रैवेयकविमानवासिन: । अनुत्तरविमानवासिनश्चेति । एते अहमिन्द्रा । नव (दश ?) विधा: ॥

नवानुदिसगाच्चय(?) कथ्यते ।-

"लच्छी अलच्छी मालिनी वैरे वैरोचने च बोधव्वा ।

सोमो य सोमरूए अंके फलिहे य आइच्चो ॥"

एते नवानुदिशा : ॥ (?)

(६) **पञ्चाऽनुत्तरा:** । कतमा: ? । विजय: । वे(वै)जयन्त: । जयन्त: । अपराजित:। सर्वार्थसिद्धश्चेति । एते पञ्चानुत्तरा: ॥

(७) **पञ्च जीवगतय:** । कतमा: ? । नरकगति: । तिर्य(ग्)गति: । मनुष्यगति:। देवगति: श्चोति । चतु(त) । मोक्षगति गतय: संसारभ्रमणहेतुभूता: । पञ्चमी गति(:) कर्म्मक्षयजनिता अष्टगुणप्राप्तिहेतु: । एता: पञ्च गतय: ॥

(८) **षट्पुद्गलगतय:** । कतमा: ? । पूर्वदक्षिणपश्चिमउत्तर ऊर्ध्वअधस्तिर्य(ग्)-गति: । एता(:) पुद्गलगतय: ॥

(९) **अष्टविध आत्मसद्भाव:** । अस्त्यात्मा नित्य: । अनित्य : । अमूर्त: । सरीर: (शरीरी ?) अरूप: । अकर्ता । गुणवान् । स(श)रीरगत: । संहरण विसथण(विस्तरण) धर्म्म(:) प्रदीपवत् । अनादिबन्धान् बद्ध: । तद्विप्रयोगो मोक्ष: । इत्येवं अष्टविधो(ध:) आत्मसद्भाव:॥

(१०) पञ्चविधं स(श)रीरम् । कतमा: (मं) ? । औदारिकं । वैक्रियं । आहारकं। तैजसं । कार्मणं चेत्येवं पञ्चविधं स(श)रीरम् ॥

(११) **अष्टगुणा रिद्धि:** । कतमा: (मा) ? । अणिमा । महिमा । लघिमा । प्राप्ति। प्रागम्य: (प्राकाम्यं) । इसि(ईशि)त्वं । वसि(शि)त्त्वं ? कामरूपित्वं । सर्व्ववसि(शि) त्वमिति । एषा अष्टगुणा रिद्धि: ॥

(१२) **पञ्चेन्द्रियाणि** । कतमानि ? । चक्षुरिन्द्रियं । श्रोत्रेन्द्रियं । घ्राणेन्द्रियं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रसनेन्द्रियं । स्पर्शनेन्द्रियं चेति । एतानि पञ्चेन्द्रियाणि भवन्ति ॥

(१३) **षट् लेश्या:** । कतमा:? कृष्णलेश्या । नीललेश्या । क(का) पोतलेश्या। तेज(जो)लेश्या । पद्मलेश्या। शुक्ललेश्या । एते षट् लेश्या: ॥

(१४) **द्विविधं शीलम्** । कतमा: । (मं) ? । सामायिकाधिकरणं । केवलज्ञानं चेति ॥

**इति अर्हत् प्रवचने चतुर्थोऽध्याय: समाप्त : ॥**

## [ पञ्चमोऽध्याय: ]

त्रिविधो योग: । चत्वार: कषाया: । त्रयो दोषा: । पञ्चाश्रवा: । त्रिविध: संवर:। द्विविधा निर्ज्जरा । पञ्च लब्धय: । चतुर्विधो बन्ध: । पञ्च बन्धहेतव: । अष्टौ कर्म्माणि । द्विविधो मोक्ष: । चत्वारो मोक्षहेतव: । त्रिविधो मोक्षमार्ग्ग:। । पं[च] विधा निर्ग्रन्था: । त्रिविधा( :) सिद्धा( :) । दादश सिद्धस्यात्(नु)योगद्वाराणि । अष्टौ सिद्धगुणा: । द्विविधा( :) सिद्धा:। वैराग्यं च ॥

इति अर्हत्प्रवचने पञ्चमसूत्रम् ॥

(१) **त्रिविधो योग:** । कतम: ? मनोयोग: । वाग्योग: । काययोगश्चेति । इत्येष त्रिविधो योग: ॥

(२) **चत्वार : कषाया:** । कतमा: ? क्रोधकषाय: । मानकषाय: । मायाकषाय:। लोभकषायश्चेति । एते चत्वार: कषाया: ॥

(३) **त्रयो दोषा:** । कतमा: ? । रागद्वेषमोहाश्चेति । एते त्रयो दोषा : ॥

(४) **पञ्चाश्रवा:** । कतमा: ? हिंसाश्रव: । अनृताश्रव: । स्तैन्याश्रव: । अब्रह्मचर्याश्रव:। परिग्रहाश्रवेत्येते पञ्चाश्रवा: ॥

(५) **त्रिविध: संवर:** । कतम: ? । कायसंवर: । वाक् संवर: । मन:संवरश्चेति । एष त्रिविध: संवर : ॥

(६) **द्विविधा निर्ज्जरा** । कतमा ? । ज्ञाननिर्ज्जरा । तपोनिर्ज्जराश्चे(चे)र ति ॥

(७) **पञ्च लब्धय:** । कतमा: ? । दानलब्धि: । लाभलब्धि: । भोगलब्धि: । उपभोगलब्धि: । वीर्यलब्धि: । एता: पञ्च लब्धय: ॥

(८) **चतुर्विधो बन्ध:** । कतम: ? । प्रकृतिबन्ध: । स्थितिबन्ध: । अनुभागबन्ध:। प्रदेशबन्ध: । एष श्च(च)तुर्विधो बन्ध:॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(९) **पञ्चबन्धहेतवः** । कतमाः ? । मिथ्यादर्शनं । अविरतिः । प्रमादः । कषाय(:)। योगश्चेति पञ्च बन्धहेतवः ॥

(१०) **अष्टौ कर्म्माणि** । कतमानि ? । ज्ञानावरणीयं । दर्शनावरणीयं। वेदनीयं । मोहनीयं । आयु(:) । नाम । गोत्रं । अन्तरायश्चेति ॥ यस्योदयात् ज्ञेयं वस्तु न जानाति तत्-(द्) ज्ञानावरणीय(यं)नाम कर्म।जे(ये)न जीवा(:) पुण्यपापाश्रवबन्धनिर्जरामोक्षादिलक्षणान् सर्वभावं(वान्)न पश्यति(न्ति) तद्दर्शनावरणीयं नाम कर्म्म । यस्योदयातु(त्) स(शा)रीरं मानु(न)सं दुःखं उदीर्यते तत्(द्) वेदनीयं नाम कर्म्म । येन क्रोधलोभमानमायारतिऽरति-(रत्यरति)शोकभयजुगुप्सादीनि उदीर्यते(न्ते) तत्(द्) मोहनीयं नाम कर्म्म । येन नरकतिर्यग्(मनुष्यामरेषु दीर्घं ह्रस्वं वा कालं तिष्ठति तदायुर्नाम कर्म्म । येनाङ्गप्रत्यङ्ग स(श)रीरं संस्थानं विरूपं स्वरूपं वा निवर्त्तयति तन्नाम कर्म्म । येन तिर्यग्मनुष्यामरेषु उच्चं नीचं वा स्थानं निवर्त्तयति तदाऽन्तरायं (तद् गोत्रं) नाम कर्म्म । येन दानलाभभोगोपभोगवीर्यानि(णि) नोत्पद्यन्ते तदन्तरायं नाम कर्म्म ॥ अत्र श्लोकाः –

यस्योदयेन जीवो जीवा विज्ञेय कर्म्म शुभाशुभम् । (?)
ज्ञानावरणमाख्यातं सर्व्वज्ञैस्तत्त्वदर्शिभिः ॥
यस्योदयात् सा(दयवशा)ज्जीवो भावाभावं न पश्यति ।
दर्शनावरणं प्राहुः सर्व्वज्ञा मुनिसत्तमाः ॥
सुखं वा यदि वा दुःखं वेदयन्ति हि येन ता(ते)
वेदनीयं तदित्याहुः सर्व्वज्ञास्तत्त्वदर्शिनः ॥
कषाया नोकषायाश्च मिथ्यादर्शनमेव च ।
मोहनीयं तदित्याहुः सर्व्व(ज्ञा)स्तत्त्वदर्शिनः ॥
जायते मृ(म्रि)यते चैव जीवा [य]स्योदयेन त्(तत्) ।
आयुष्यं नाम तत् कर्म्म प्राहुरेव मनीषिणः ॥
स्वरूपो[वा] विरूपो वा सुभगो दुर्भगोऽपि वा ।
कर्मणा जायते येन नामकर्मं(र्म) तदुच्यते ॥
जघन्यमथवा श्रेष्ठं येन गोत्रमवाप्यते ।
ऐश्वर्यं प्रेष्यभावश्च गोत्रकर्म्म तदुच्यते ॥
येन लाभो न[ल]भ्येत कर्मकर्मार्थसंचित : ॥(?)
न चोपभु(भुं)क्ते संप्राप्तः अन्तरायः स उच्यते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सु(शु)भानां कर्मणां हेतुः सु(शु)भ एव स्मृतो बुधैः ।
अशुभानां चाशुभः प्रोक्त(क्तो) जिनेन्द्रैस्तत्त्वदर्शिभिः ॥

(११) **द्विविधो मोक्षः** । कतमः? । देशमोक्षः। सर्व्वमोक्षश्चेति ।

देशमोक्षोनाम सासन(सास्वादन?) सम्यग्दृष्ट्यादिसयोगकेवलिपर्यन्तः।सर्व्वमोक्षो नाम अजो(यो)गकेवली सिद्धश्चेति ॥

(१२) **चत्वारो मोक्षहेतवः** । कतमाः ? । सम्यग्‌दर्शनं । सम्यक्(ग्)ज्ञानं । सम्यक्‌चारित्रं । सम्यक् तपश्चेति ॥

(१३) **त्रिविधो मोक्षमार्ग्गः** । कतम : ? । सम्यग्‌दर्शनं । सम्यग्‌ज्ञानं । सम्यक् चारित्रमिति ॥

(१४) **पञ्चविधा निर्ग्रन्थाः** । कतमाः ? । पुलाकः । बकुस(श) : । कुसी(शी)लः। निर्ग्रन्थः । स्नातकश्चेति ॥ यः स्थित्यादिकरणकारणोद्युक्तः मार्ग्गप्रभावकः सप्रतिकारी प्रशस्तवचनःकुशलः सर्व्वज्ञप्रतिष्ठापनः पूजादीनां कर्ता कारयिता च स पुलाको नाम । यो मतिश्रुतप्रतिपादनमार्ग्गप्रभावना(नो)द्युक्तः अर्हन्सु(त् शु)द्धसील:(शील)कथाभिलो-(लों)क परिपाटी **प्रथमानुयोग** वाचकः यथाशक्ति तपस्त्यागकर्ता विनयशीलो अन्य(न्यं) समुपदिश्य प्रवर्तकः अर्हदाचार्यबहुश्रुत प्रवचनं(न) भक्ति स्तुतिवन्दनालोचनप्रतिक्रमण-कायोत्सर्ग्गाणां कारकः सुप्रसन्न(:) परिहारसंज(य)मधरः स एष बपु(कु)शो नाम । ईषत्पण्डितशीलः कुशीलः दयापरः परमकारुणिकः सर्व्वभूतमैत्रीपरायणः अत्यन्तसूक्ष्म सा(स) म्परायसंज(य)मधरः द्वादशाङ्ग चतुर्द्दशपूर्व्वपारगः घोरवीरतपश्च[र]णोद्युक्तः स एष कुशीलो नाम। बाह्याभ्यन्तर ग्रन्थार्थपरित्यागी । बाह्यपरिग्रहः क्षेत्रव(वा)स्तुहिरण्यधनधान्य-कुप्यपसु(शु)पाल्यपुत्रदाराभिः। अभ्यन्तरप(रि)ग्रहः क्रोधमानमायालोभमात्सर्यत्रीड(ड्ग)-रतिशोकभयजुगुप्साहास्यप्रमत्तयोगप्रत्याख्यानहिंसानृतस्तेयमैथुनपरिग्रहादिग्रन्थपरित्याग-शीलः। चतुर्ज्ञानसम्पन्नो लब्धिप्राप्तः शुक्लध्यानपरः निर्ममो निरहङ्कारः उत्तमसंज(य)मधरः विशुद्धलेश्यः स एष निर्गन्थो नाम । परमेश्वरः सर्व्वज्ञो लोकालोकविचारकः चतुस्त्रिशदतिशयलब्धिप्राप्तः अष्टमहाप्रातिहार्यसमन्वितः स एष स्नातको नाम । एते पञ्चविधा निर्ग्रन्थाः ॥

(१५) **त्रिविधाः सिद्धाः** । कतमाः ? । क्षेत्रसिद्धाः । कालसिद्धाः । भावसिद्धाश्चेति । तत्र ये पञ्चदशकर्म्मभूमिषु जाता ऊर्ध्वाधस्तिर्यग्लोकेषु सिध्यन्ति ते क्षेत्रसिद्धाः । ये उत्सर्पिण्यो (ण्यां ?) जाताः तीर्थेषु एकसमयसिद्धा द्विसमयसिद्धा(:)तृ(त्रि)चतुरसंख्येय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समयसिद्धाः ते कालसिद्धा नाम। ये अष्टविधकर्म्मविनिर्मुक्त्र(:) सिद्धि प्राप्ताः ते भावसिद्धा नाम। एते त्रिविधा(:) सिद्धाः ॥

(१६) **द्वादश सिद्धस्यानुयोगद्वाराणि**। कतमानि ?। कालो(लः)। गतिः। लिङ्गः(ङ्गम्)तीर्थ(म्)। चारित्रः(त्रं)। प्रत्येकबुद्धः। बोधितबुद्धः। ज्ञानावगाहनं (ज्ञानम्। अवगाहना।) अनांतरं (अन्तरं)। संख्याअल्पबहुत्वतश्चेति(त्वं चेति)। एतानि द्वादश सिद्धस्यानुयोगद्वाराणि॥

(१७) **अष्टौ सिद्धगुणाः**। कतमाः ?। अनन्तदर्शनं। अनन्तज्ञानं। अनन्तवीर्यं। अनन्तसुखं। सूक्ष्मत्वं। अनन्तावगाहः। अग(गु)रुलहु(घु)त्वं। अव्याबाधश्चेति। एते अष्टगुणाः ॥

(१८) द्विविधा(:)सिद्धाः। कतमाः ?। मोहान्तराय [ज्ञान] दर्शनावरणीयक्षयात् कैवल्यप्राप्तिसिद्धाः। आयुर्नामगोत्रवेदनीयक्षयात् स्नातकसिद्धाश्चेति ॥ तत्र मोहो नाम द्विविधः। चारित्रमाह(हो)दर्शनमोहश्चेति। चारित्रमोहक्षयात्(द्) वीतरागो भवति। दर्शनमोहक्षयात् सम्यग्दृष्टिर्भवति। अन्तरायक्षयात्(द्)दिव्यानि दानलाभभोगोपभोगवीर्याण्युत्पद्यन्ते। ज्ञानावरणीयक्षयात् सर्व्वज्ञो भवति। दर्शनावरणीयक्षयात् सर्व्वदर्शी भवति। आयुष्यकर्म्मक्षयात्(द्) जन्ममरणव्याधिविनिर्मुक्तो भवति। नामकर्म्मक्षयात्(द्) औदारिकवैक्रियाहारकतैजसकार्मणशरीरं(र)तत्त्वविनिर्मुक्तो भवति। आकास(श)वदमूर्तश्चक्षुरग्राही ज्योजावघ(?) रूपो भवति। गोत्रकर्मक्षयात् सदेवासुरमनुष्यलोकस्योत्तमस्थानं प्राप्नोति। वेदनीयकर्मक्षयात् सुखदुःखाभ्यां विनिर्मुक्तो भवति। केवलमव्याबाधं सम्प्राप्तो भवति। लोकाग्रे प्रतिष्ठितो अदेही शाश्वतो वक्तो( मुक्तो) अमरो अजरो निरंजनो भवति। एते षट्(? द्वि)विधाः सिद्धा भवन्ति ॥

**इत्यर्हत्प्रवचने पञ्चमोऽध्याय समाप्तः ॥**

मङ्गलं महाश्रीः ॥ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org